# || काल भैरव स्तुति ||

यं यं यं यक्षरूपं दशदिशिविदितं भूमिकम्पायमानं, सं सं संहारमूर्तिं शिरमुकुटजटाशेखरं चन्द्रबिम्बम्।।

दं दं दं दीर्घकायं विकृतनखमुखं चोर्ध्वरोमं करालं, पं पं पं पापनाशं प्रणमत सततं भैरवं क्षेत्रपालम् ।। १ ।।

रं रं रं रक्तवर्णं कटिकटिततनुं तीक्ष्णदंष्ट्राकरालं, घं घं घं घोषघोषं घ घ घ घ घटितं घर्घरं घोरनादम्।।

कं कं कं कालपाशं धृकधृकधृकितं ज्वालितं कामदेहं, तं तं तं दिव्यदेहं प्रणमत सततं भैरवं क्षेत्रपालम् ।। २ ।।

लं लं लं लं वदन्तं ल ल ल ल ललितं दीर्घजिह्वाकरालं, धुं धुं धुं धूम्रवर्णं स्फुटविकटमुखं भास्करं भीमरूपम्।।

रुं रुं रुं रुण्डमालं रवितमनियतं ताम्रनेत्रं करालं, नं नं नं नग्नभूषं प्रणमत सततं भैरवं क्षेत्रपालम् ।। ३ ।।

वं वं वं वायुवेगं नतजनसदयं ब्रह्मपारं परं तं, खं खं खं खड्गहस्तं त्रिभुवननिलयं भास्करं भीमरूपम्।।

चं चं चं चं चलित्वा चलचलचलितं चालितं भूमिचक्रं, मं मं मं मायिरूपं प्रणमत सततं भैरवं क्षेत्रपालम् ।। ४ ।।

शं शं शं शङ्खहस्तं शशिकरधवलं मोक्षसंपूर्णतेजं, मं मं मं मं महान्तं कुलमकुलकुलं मन्त्रगुप्तं सुनित्यम्।।

यं यं यं भूतनाथं किलिकिलिकिलितं बालकेलिप्रधानं, अं अं अं अन्तरिक्षं प्रणमत सततं भैरवं क्षेत्रपालम् ।। ५ ।।

खं खं खं खड्गभेदं विषममृतमयं कालकालं करालं, क्षं क्षं क्षं क्षिप्रवेगं दहदहदहनं तप्तसन्दीप्यमानम्।।

हौं हौं हौंकारनादं प्रकटितगहनं गर्जितैर्भूमिकम्पं, बं बं बं बाललीलं प्रणमत सततं भैरवं क्षेत्रपालम् ।। ६ ।।

सं सं सं सिद्धियोगं सकलगुणमखं देवदेवं प्रसन्नं, पं पं पं पद्मनाभं हरिहरमयनं चन्द्रसूर्याग्निनेत्रम्।।

ऐं ऐं ऐश्वर्यनाथं सततभयहरं पूर्वदेवस्वरूपं, रौं रौं रौं रौद्ररूपं प्रणमत सततं भैरवं क्षेत्रपालम् ।। ७ ।।

हं हं हं हंसयानं हपितकलहकं मुक्तयोगाट्टहासं, धं धं धं नेत्ररूपं शिरमुकुटजटाबन्धबन्धाग्रहस्तम्।।

टं टं टं टङ्कारनादं त्रिदशलटलटं कामवर्गापहारं, भृं भृं भृं भूतनाथं प्रणमत सततं भैरवं क्षेत्रपालम् ।। ८ ।।

इत्येवं कामयुक्तं प्रपठति नियतं भैरवस्याष्टकं यो, निर्विघ्नं दुःखनाशं सुरभयहरणं डाकिनीशाकिनीनाम्।।

नश्येद्धिव्याघ्रसर्पौ हुतवहसलिले राज्यशंसस्य शून्यं,सर्वा नश्यन्ति दूरं विपद इति भृशं चिन्तनात्सर्वसिद्धिम् ।। ९ ।।

भैरवस्याष्टकमिदं षण्मासं यः पठेन्नरः।।

स याति परमं स्थानं यत्र देवो महेश्वरः ।। १० ।।

paramsoul.com